# अथ ऐतरेयोपनिषत्।

# atha aitareyopaniṣat|

वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि॥ वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि सत्यं वदिष्यामि॥ तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम्॥

॥ ॐ शान्तिः शान्तिः शान्तिः॥

vāṅ me manasi pratiṣṭhitā mano me vāci pratiṣṭhitamāvirāvīrma edhi || vedasya ma āṇīsthaḥ śrutaṁ me mā prahāsīranenādhītenāhorātrān sandadhāmyṛtaṁ vadiṣyāmi satyaṁ vadiṣyāmi || tanmāmavatu tadvaktāramavatvavatu māmavatu vaktāramavatu vaktāram ||

|| om śāntiḥ śāntiḥ śāntiḥ||

॥ अथ ऐतरेयोपनिषदि प्रथमाध्याये प्रथमः खण्डः॥

ॐ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा इति॥ १॥

स इमाँ ल्लोकानसृजत। अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः। पृथिवी मरो या अधस्तात्त आपः॥ २॥

स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति॥ सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत्॥ ३॥ तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथाऽण्डं मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतं नासिकाभ्यां प्राणः। प्राणाद्वायुरक्षिणी निरभिद्येतमक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः

शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥ ४॥

॥ इत्यैतरेयोपनिषदि प्रथमाध्याये प्रथमः खण्डः ॥

|| atha aitareyopaniṣadi prathamādhyāye prathamaḥ khaṇḍaḥ ||

om ātmā vā idameka evāgra āsīnnānyatkiñcana miṣat | sa īkṣata lokānnu sṛjā iti || 1|| sa imām̐llokānasṛjata | ambho marīcīrmaramāpo'do'mbhaḥ pareṇa divaṁ dyauḥ pratiṣṭhā'ntarikṣaṁ marīcayaḥ | pṛthivī maro yā adhastātta āpaḥ || 2|| sa īkṣateme nu lokā lokapālānnu sṛjā iti || so'dbhya eva puruṣaṁ samuddhṛtyāmūrchayat || 3|| tamabhyatapattasyābhitaptasya mukhaṁ nirabhidyata yathā'ṇḍaṁ mukhādvāgvāco'gnirnāsike nirabhidyetaṁ nāsikābhyāṁ prāṇaḥ | prāṇādvāyurakṣiṇī nirabhidyetamakṣībhyāṁ cakṣuścakṣuṣa ādityaḥ karṇau nirabhidyetāṁ karṇābhyāṁ śrotraṁ śrotraddiśastvaṅnirabhidyata tvaco lomāni lomabhya oṣadhivanaspatayo hṛdayaṁ nirabhidyata hṛdayānmano manasaścandramā nābhirnirabhidyata nābhyā apāno'pānānmṛtyuḥ śiśnaṁ nirabhidyata śiśnādreto retasa āpaḥ || 4||

|| ityaitareyopaniṣadi prathamādhyāye prathamaḥ khaṇḍaḥ ||

॥ अथ ऐतरेयोपनिषदि प्रथमाध्याये द्वितीयः खण्डः ॥

ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतन् । तमशनापिपासाभ्यामन्ववार्जत्। ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति॥ १॥ ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति। ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति॥ २॥ ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति पुरुषो वाव सुकृतम्। ता अब्रवीद्यथायतनं प्रविशतेति॥ ३॥ अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन्॥ ४॥

तमशनायापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्न्यौ करोमीति। तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनायापिपासे भवतः॥ ५॥

## ॥ इत्यैतरेयोपनिषदि प्रथमाध्याये द्वितीयः खण्डः ॥

|| atha aitareyopaniṣadi prathamādhyāye dvitīyaḥ khaṇḍaḥ ||

tā etā devatāḥ sṛṣṭā asminmahatyarṇave prāpatan | tamaśanāpipāsābhyāmanvavārjat | tā enam abruvannāyatanaṁ naḥ prajānīhi yasminpratiṣṭhitā annamadāmeti || 1|| tābhyo gāmānayattā abruvanna vai no'yamalamiti | tābhyo'śvamānayattā abruvanna vai no'yamalamiti || 2|| tābhyaḥ puruṣamānayattā abruvan sukṛtaṁ bateti puruṣo vāva sukṛtam | tā abravīdyathāyatanaṁ praviśateti || 3|| agnirvāgbhūtvā mukhaṁ prāviśadvāyuḥ prāṇo bhūtvā nāsike prāviśadādityaścakṣurbhūtvā'kṣiṇī prāviśāddiśaḥ śrotraṁ bhūtvā karṇau prāviśannoṣadhivanaspatayo lomāni bhūtvā tvacaṁprāviśaṁścandramā mano bhūtvā hṛdayaṁ prāviśanmṛtyurapāno bhūtvā nābhiṁ prāviśadāpo reto bhūtvā śiśnaṁ prāviśan || 4|| tamaśanāyāpipāse abrūtāmāvābhyāmabhiprajānīhīti te abravīdetāsveva vāṁ devatāsvābhajāmyetāsu bhāginnyau karomīti | tasmādyasyai kasyai ca devatāyai havirgṛhyate bhāginyāvevāsyāmaśanāyāpipāse bhavataḥ || 5||

|| ityaitareyopaniṣadi prathamādhyāye dvitīyaḥ khaṇḍaḥ ||

## ॥ अथ ऐतरेयोपनिषदि प्रथमाध्याये तृतीयः खण्डः ॥

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति॥ १॥

सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो मूर्तिरजायत। या वै सा मूर्तिरजायतान्नं वै तत्॥ २॥

तदेनत्सृष्टं पराङ्त्यजिघांसत्तद्वाचाऽजिघृक्षत् तन्नाशक्नोद्वाचा ग्रहीतुम्। स यद्धैनद्वाचाऽग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत्॥ ३॥ तत्प्राणेनाजिघृक्षत् तन्नाशक्नोत्प्राणेन ग्रहीतुं स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्॥ ४॥ तच्चक्षुषाऽजिघृक्षत् तन्नाशक्नोच्चक्षुषा ग्रहीतुन् स यद्धैनच्चक्षुषाऽग्रहैष्यद्दृष्ट्वा हैवानमत्रप्स्यत्॥ ५॥ तच्छ्रोत्रेणाजिघृक्षत् तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स यद्धैनच्छ्रोतेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्॥ ६॥ तत्त्वचाऽजिघृक्षत् तन्नाशक्नोत्त्वचा ग्रहीतुं स यद्धैनत्त्वचाऽग्रहैष्यत् स्पृष्ट्वा हैवान्नमत्रप्स्यत्॥ ७॥ तन्मनसाऽजिघृक्षत् तन्नाशक्नोन्मनसा ग्रहीतुं स यद्धैनन्मनसाऽग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत्॥ ८॥ तच्छिश्नेनाजिघृक्षत् तन्नाशक्नोच्छिश्नेन

ग्रहीतुं स यद्धैनच्छिश्नेनाग्रहैष्यद्वित्सृज्य हैवानमत्रप्स्यत्॥ ९॥ तदपानेनाजिघृक्षत् तदावयत् सैषोऽन्नस्य ग्रहो यद्वायुरनायुर्वा एष यद्वायुः॥ १०॥

|| atha aitareyopaniṣadi prathamādhyāye tṛtīyaḥ khaṇḍaḥ ||

sa īkṣateme nu lokāśca lokapālāścānnamebhyaḥ sṛjā iti || 1||
so'po'bhyatapattābhyo'bhitaptābhyo mūrtirajāyata | yā vai sā mūrtirajāyatānnaṁ vai tat || 2||
tadenatsṛṣṭaṁ parāṅtyajighāṁsattadvācā'jighṛkṣat tannāśaknodvācā grahītum | sa
yaddhainadvācā'grahaiṣyadabhivyāhṛtya haivānnamatrapsyat || 3|| tatprāṇenājighṛkṣat
tannāśaknotprāṇena grahītuṁ sa yaddhainatprāṇenāgrahaiṣyadabhiprāṇya
haivānnamatrapsyat || 4|| taccakṣuṣā'jighṛkṣat tannāśaknoccakṣuṣā grahītun sa
yaddhainaccakṣuṣā'grahaiṣyaddṛṣṭvā haivānamatrapsyat || 5|| tacchrotreṇājighṛkṣat
tannāśaknocchrotreṇa grahītuṁ sa yaddhainacchroteṇāgrahaiṣyacchrutvā haivānnamatrapsyat
|| 6|| tattvacā'jighṛkṣat tannāśaknottvacā grahītuṁ sa yaddhainattvacā'grahaiṣyat spṛṣṭvā
haivānnamatrapsyat || 7|| tanmanasā'jighṛkṣat tannāśaknonmanasā grahītuṁ sa
yaddhainanmanasā'grahaiṣyaddhyātvā haivānnamatrapsyat || 8|| tacchiśnenājighṛkṣat
tannāśaknocchiśnena grahītuṁ sa yaddhainacchiśnenāgrahaiṣyadvitsṛjya haivānamatrapsyat ||
9|| tadapānenājighṛkṣat tadāvayat saiṣo'nnasya graho yadvāyuranāyurvā eṣa yadvāyuḥ || 10||

स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत कतरेण प्रपद्या इति। स ईक्षत यदि वाचाऽभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति॥ ११॥ स एतमेव सीमानं विदर्यैतया द्वारा प्रापद्यत। सैषा विदृतिर्नाम द्वास्तदेतन्नाऽन्दनम्। तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथोऽयमावसथोऽयमावसथ इति॥ १२॥ स जातो भूतान्यभिव्यैख्यत् किमिहान्यं वावदिषदिति।स एतमेव पुरुषं ब्रह्म ततममपश्यत्। इदमदर्शनमिती ॥ १३॥ तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम। तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः॥ १४॥

॥ इत्यैतरेयोपनिषदि प्रथमाध्याये तृतीयः खण्डः॥

sa īkṣata kathaṁ nvidaṁ madṛte syāditi sa īkṣata katareṇa prapadyā iti | sa īkṣata yadi vācā'bhivyāhṛtaṁ yadi prāṇenābhiprāṇitaṁ yadi cakṣuṣā dṛṣṭaṁ yadi śrotreṇa śrutaṁ yadi tvacā spṛṣṭaṁ yadi manasā dhyātaṁ yadyapānenābhyapānitaṁ yadi śiśnena visṛṣṭamatha ko'hamiti || 11|| sa etameva sīmānaṁ vidaryaitayā dvārā prāpadyata | saiṣā vidṛtirnāma dvāstadetannā'ndanam | tasya traya āvasathāstrayaḥ svapnā ayamāvasatho'yamāvasatho'yamāvasatha iti || 12||

sa jāto bhūtānyabhivyaikhyat kimihānyaṁ vāvadiṣaditi |sa etameva puruṣaṁ brahma tatamamapaśyat | idamadarśanamitī 3 || 13|| tasmādidandro nāmedandro ha vai nāma | tamidandraṁ santamindra ityācakṣate parokṣeṇa | parokṣapriyā iva hi devāḥ parokṣapriyā iva hi devāḥ || 14||

|| ityaitareyopaniṣadi prathamādhyāye tṛtīyaḥ khaṇḍaḥ ||

## ॥ अथ ऐतरोपनिषदि द्वितीयोध्यायः ॥

ॐ पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतः ।तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतमात्मन्येवऽऽत्मानं बिभर्ति तद्यदा स्त्रियां सिञ्चत्यथैनज्जनयति तदस्य प्रथमं जन्म॥ १॥ तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा। तस्मादेनां न हिनस्ति। साऽस्यैतमात्मानमत्र गतं भावयति॥ २॥ सा भावयित्री भावयितव्या भवति। तं स्त्री गर्भं बिभर्ति। सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति। स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येषं लोकानां सन्तत्या। एवं सन्तता हीमे लोकास्तदस्य द्वितीयं जन्म॥ ३॥ सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते। अथास्यायामितर आत्मा कृतकृत्यो वयोगतः प्रैति। स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म॥ ४॥ तदुक्तमृषिणा गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति। गर्भ एवैतच्छयानो वामदेव एवमुवाच॥ ५॥ स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत्॥ ६॥

॥ इत्यैतरोपनिषदि द्वितीयोध्यायः ॥

|| atha aitaropaniṣadi dvitīyodhyāyaḥ ||

om puruṣe ha vā ayamādito garbho bhavati yadetadretaḥ |tadetatsarvebhyo'ṅgebhyastejaḥ saṁbhūtamātmanyeva''tmānaṁ bibharti tadyadā striyāṁ siñcatyathainajjanayati tadasya prathamaṁ janma || 1|| tatstriyā ātmabhūyaṁ gacchati yathā svamaṅgaṁ tathā | tasmādenāṁ na hinasti | sā'syaitamātmānamatra gataṁ bhāvayati || 2|| sā bhāvayitrī bhāvayitavyā bhavati | taṁ strī garbha bibharti | so'gra eva kumāraṁ janmano'gre'dhibhāvayati | sa yatkumāraṁ janmano'gre'dhibhāvayatyātmānameva tadbhāvayatyeṣaṁ lokānāṁ santatyā | evaṁ santatā hīme lokāstadasya dvitīyaṁ janma || 3|| so'syāyamātmā puṇyebhyaḥ karmabhyaḥ pratidhīyate | athāsyāyāmitara ātmā kṛtakṛtyo vayogataḥ praiti | sa itaḥ prayanneva punarjāyate tadasya tṛtīyaṁ janma || 4|| taduktamṛṣiṇā garbhe nu sannanveṣāmavedamahaṁ devānāṁ janimāni viśvā śataṁ mā pura āyasīrarakṣannadhaḥ śyeno javasā niradīyamiti | garbha evaitacchayāno vāmadeva evamuvāca || 5|| sa evaṁ vidvānasmāccharīrabhedādūrdhva utkramyāmuṣmin svarge loke sarvān kāmānāptvā'mṛtaḥ samabhavat samabhavat || 6||

|| ityaitaropaniṣadi dvitīyodhyāyaḥ ||

॥ अथ ऐतरोपनिषदि तृतीयोध्यायः ॥

ॐ कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा। येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति॥ १॥ यदेतद्धृदयं मनश्चैतत्। सञ्ज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिमतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति॥ २॥ एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्चमहाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव। बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म॥ ३॥ स एतेन प्राज्ञेनाऽऽत्मनाऽस्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत्॥ ४॥

॥ इत्यैतरोपनिषदि तृतीयोध्यायः ॥

|| atha aitaropaniṣadi tṛtīyodhyāyaḥ ||

om ko'yamātmeti vayamupāsmahe kataraḥ sa ātmā | yena vā paśyati yena vā śṛṇoti yena vā gandhānājighrati yena vā vācaṁ vyākaroti yena vā svādu cāsvādu ca vijānāti || 1|| yadetaddhṛdayaṁ manaścaitat | sañjñānamājñānaṁ vijñānaṁ prajñānaṁ medhā dṛṣṭirdhṛtimatirmanīṣā jūtiḥ smṛtiḥ saṅkalpaḥ kraturasuḥ kāmo vaśa iti | sarvāṇyevaitāni prajñānasya nāmadheyāni bhavanti || 2|| eṣa brahmaiṣa indra eṣa prajāpatirete sarve devā imāni ca pañcamahābhūtāni pṛthivī vāyurākāśa āpo jyotīṁṣītyetānīmāni ca kṣudramiśrāṇīva | bījānītarāṇi cetarāṇi cāṇḍajāni ca jārujāni ca svedajāni codbhijjāni cāśvā gāvaḥ puruṣā hastino yatkiñcedaṁ prāṇi jaṅgamaṁ ca patatri ca yacca sthāvaraṁ sarvaṁ tatprajñānetraṁ prajñāne pratiṣṭhitaṁ prajñānetro lokaḥ prajñā pratiṣṭhā prajñānaṁ brahma || 3|| sa etena prājñenā''tmanā'smāllokādutkramyāmuṣminsvarge loke sarvān kāmānāptvā'mṛtaḥ samabhavat samabhavat || 4||

|| ityaitaropaniṣadi tṛtīyodhyāyaḥ ||

ॐ वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम्॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

om vāṅ me manasi pratiṣṭhitā mano me vāci pratiṣṭhitamāvirāvīrma edhi vedasya ma āṇīsthaḥ śrutaṁ me mā prahāsīranenādhītenāhorātrān sandadhāmyṛtaṁ vadiṣyāmi satyaṁ vadiṣyāmi tanmāmavatu tadvaktāramavatvavatu māmavatu vaktāramavatu vaktāram ||

|| om śāntiḥ śāntiḥ śāntiḥ||